# Shri Matripadapankajashtakam

# શ્રીમાતૃપદપઙ્કજાષ્ટકમ્

## Document Information

Text title : mAtRRipadapankajAShTakam

File name : mAtRRipadapankajAShTakam.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, devI, sarasvatI, aShTaka

Location : doc_devii

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીમાતૃપદપઙ્કજાષ્ટકમ્

માતસ્ત્વત્પદપઙ્કજં કલ્યતાં ચેતોઽમ્બુજે સન્તતં
    માનાથામ્બુજસમ્ભવાદ્રિતનયાકાન્તૈઃ સમારાધિતમ્ ।
વાઞ્છાપૂરણનિર્જિતામરમહીરુડ્ગર્વસર્વસ્વકમ્
    વાચઃ સૂક્તિસુધારસદ્રવમુચો નિર્યાન્તિ વક્ત્રોદરાત્ ॥ ૧॥

માતસ્ત્વત્પદપઙ્કજં મુનિમનઃકાસારવાસાદરં
    માયામોહમહાન્ધકારમિહિરં માનાતિગપ્રાભવમ્ ।
માતઙ્ગાભિમતિં સ્વકીયગમનૈર્નિર્મૂલયત્કૌતુકા-
    દ્વન્દેઽમન્દતપઃફલાપ્યનમનસ્તોત્રાર્ચનાપ્રક્રમમ્ ॥ ૨॥

માતસ્ત્વત્પદપઙ્કજં પ્રણમતામાનન્દવારાન્નિધે
    રાકાશારદપૂર્ણચન્દ્રનિકરં કામાહિપક્ષીશ્વરમ્ ।
વૃન્દં પ્રાણભૃતાં સ્વનામ વદતામત્યાદરાત્સત્વરં
    ષદ્ભાષાસરિદીશ્વરં પ્રતિદધત્ષાણ્માતુરાર્ચ્યં ભજે ॥ ૩॥

કામં ફાલતલે દુરક્ષરતતિર્દૈવી મમાસ્તાં ન ભી-
    ર્માતસ્ત્વત્પદપઙ્કજોત્થરજસા લુમ્પામિ તાં નિશ્ચિતમ્ ।
માર્કણ્ડેયમુનિર્યથા ભવપદામ્ભોજાર્ચનાપ્રાભવાત્
    કાલં તદ્વદહં ચતુર્મુખમુખામ્ભોજાતસૂર્યપ્રભે ॥ ૪॥

પાપાનિ પ્રશમં નયાશુ મમતાં દેહેન્દ્રિયપ્રાણગાં
    કામાદીનપિ વૈરિણો દૃઢતરાન્મોક્ષાધ્વવિઘ્નપ્રદાન્ ।
સ્નિગ્ધાન્પોષય સન્તતં શમદમધ્યાનાદિમાન્મોદતો
    માતસ્ત્વત્પદપઙ્કજં હૃદિ સદા કુર્વે ગિરાં દેવતે ॥ ૫॥

માતસ્ત્વત્પદપઙ્કજસ્ય મનસા વાચા ક્રિયાતોઽપિ વા
    યે કુર્વન્તિ મુદાન્વહં બહુવિધૈર્દિવ્યૈઃ સુમૈરર્ચનામ્ ।
શીઘ્રં તે પ્રભવન્તિ ભૂમિપતયો નિન્દન્તિ ચ સ્વશ્રિયા
    જમ્ભારાતિમપિ ધ્રુવં શતમખીકષ્ટાપ્તનાકશ્રિયમ્ ॥ ૬॥

માતસ્ત્વત્પદપકજં શિરસિ યે પદ્માટવીમધ્યત-
    શ્ચન્દ્રાભં પ્રવિચિન્તયન્તિ પુરુષાઃ પીયૂષવર્ષ્યન્ચહમ્ ।
તે મૃત્યું પ્રવિજિત્ય રોગરહિતાઃ સમ્યગ્દૃઢાઙ્ગાશ્ચિરં
    જીવન્ત્યેવ મૃણાલકોમલવપુષ્મન્તઃ સુરૂપા ભુવિ ॥ ૭॥

માતસ્ત્વત્પદપઙ્કજં હૃદિ મુદા ધ્યાયન્તિ યે માનવાઃ
    સચ્ચિદ્રૂપમશેષવેદશિરસાં તાત્પર્યગમ્યં મુહુઃ ।
અત્યાગેઽપિ તનોરખણ્ડપરમાનન્દં વહન્તઃ સદા
    સર્વં વિશ્વમિદં વિનાશિ તરસા પશ્યન્તિ તે પૂરુષાઃ ॥ ૮॥

ઇતિ શ ૃઙ્ગેરિ શ્રીજગદ્ગુરુ શ્રીસચ્ચિદાનન્દશિવાભિનવનૃસિંહ-
ભારતીસ્વામિભિઃ વિરચિતં શ્રીમાતૃપદપઙ્કજાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Matripadapankajashtakam*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*